2016

M. A.

Part-II Examination

SANSKRIT

Paper – VI

*Full Marks* : 100

*Time* : 4 Hours

*The figures in the right-hand margin indicate full marks.*

*Candidates are required to give their answers in their own words as far as practicable.*

First Half [Marks–50]

1. अनुमानलक्षणं दीयताम्। तत्र व्याप्तिज्ञानस्य कीदृशी उपयोगिता विद्यते? परामर्शज्ञानस्य च स्वीकारे किं तात्पर्यम् ? 3+5+5

अथवा

तर्कभाषामवलम्ब्य प्रमायाः लक्षणमुल्लिख्य संशय-विपर्ययस्मृतीनां प्रमात्वमस्ति न वेति विचार्यताम् । 2+3+3+5

*(Turn Over)*

2. कस्याचिदेकस्य टीका देया — 6

आत्मा अयुतसिद्धः सम्बन्धः, प्रत्यक्षप्रमा ।

3. अधोलिखितेषु प्रश्नेषु यथेच्छं प्रश्नत्रयं देवनागरीलिप्या संस्कृतभाषया च पूर्णवाक्येन समाधेयम् । 2×3

a) न्यायशास्त्रस्य प्रवृत्तिः कतिधा ? काश्च ताः ?

b) तर्कभाषाग्रन्थे पूर्वपक्षरूपेणोपस्थापितं मीमांसकानां कारणलक्षणमुच्यताम्। प्रसङ्गेऽस्मिन् केशवमिश्रसम्मतं कारणलक्षणं च दीयताम् ।

c) करणं नाम किम् ?

d) अन्यथासिद्धशब्दस्य कोऽर्थः ?

e) वाक्यलक्षणमुच्यताम् ।

4. सांख्यसम्मतं पञ्चविंशतितत्त्वस्वरूपमालोच्यताम् । 13

अथवा

सांख्यशास्त्रजिज्ञासा कथमुत्पद्यते ?

5. सप्रसङ्गं व्याख्यायताम् — 6

दृष्टमनुमानमाप्तवचनं सर्वप्रमाणसिद्धत्वात् ।

अथवा

पुरुषोऽस्ति भोक्तृभावात् कैवल्यार्थप्रवृत्तेश्च ।

6. अधोलिखितेषु यथेच्छं प्रश्नत्रयं देवनागरीलिप्या संस्कृतभाषया च पूर्ववाक्येन समाधेयम् । 2×3

a) सांख्यमते प्रमाणं कतिविधम् ? कानि च तानि ?





b) किमाध्यात्मिकं दुःखम् ?

c) सांख्यसम्मतं प्रत्यक्षलक्षणं किम् ?

d) सांख्यशास्त्रे किं स्वीकृतम्, पुरुषस्य एकत्वं बहुत्वं वा?

e) प्रकृतेः प्रथमः परिणामः किम् ?

f) अव्यक्तशब्देन किं बुध्यते ?

## Second Half [Marks–50]

1. अधोलिखितेषु द्वयोरुत्तरं देयम् — 10×2

क) अनुबन्धचतुष्टयस्य नामान्युल्लिख्य अधिकारिस्वरूपं विशदमालोचनीयम्।

ख) 'वस्तुन्यवस्त्वारोपोऽध्यारोपः'-इति ग्रन्थस्य तात्पर्यं व्याख्यायताम् ।

ग) तत्त्वमसीति महावाक्यस्याखण्डार्थ—बोधकत्वं प्रतिपादनीयम् ।

घ) षड्विधस्य लिङ्गस्य विवरणं प्रदीयताम् ।

2. अधोलिखितेषु एकस्य व्याख्या कार्या — 5

क) विवर्त्तवादः ।

ख) विज्ञानमयकोशः ।

ग) लिङ्गशरीरम् ।

घ) जीवन्मुक्तिः ।

3. अधोलिखितेषु एकः प्रश्नः समाधेयः — 12

क) रक्षोहागमलघ्वसन्देहाः प्रयोजनम् —व्याख्यायताम् ।

ख) शब्दस्य ज्ञाने धर्मः प्रयोगे वा ? सयुक्तिकं सिद्धान्तः प्रतिपादनीयः।

ग) व्याकरणमित्यस्य शब्दस्य कः पदार्थः? भाष्यकारानुसारं निरूप्यताम्।

4. अधोलिखितेषु एकस्य तात्पर्यं विशद्यताम् — 7

क) सक्तुमिव तितउना पुनन्तो यत्र धीरा मनसा वाचमक्रत ।
अत्रा सखायः सख्यानि जानते भद्रैषां लक्ष्मीर्निहिताधिवाचि ॥

ख) यस्तु प्रयुङ्क्ते कुशलो विशेषे शब्दान् यथावद् व्यवहारकाले ।
सोऽनन्तमाप्नोति जयं परत्र वाग्योगविद् दुष्यति चापशब्दैः ॥

5. अधोलिखितेषु एकस्य व्याख्या कार्या — 6

क) किञ्चित् सामान्यविशेषवल् लक्षणं प्रवर्त्यम् ।

ख) यथा लैकिकवैदिकेषु ।

ग) वृत्तिसमवायार्थ उपदेशः ।

—०—

i।